शब्द–ब्रह्म

E ISSN 2320 – 0871

भारतीय भाषाओं की अंतर्राष्ट्रीय मासिक शोध पत्रिका

17 जनवरी 2020

पीअर रीव्यूड रेफ्रीड रिसर्च जर्नल

# भट्टलक्ष्मीधरस्य चक्रपाणिविजयम् इति महाकाव्ये कतिपयसमासप्रयोगाणां व्याकरणदृष्ट्या परिशीलनम्

डा. जयकृष्णः
सहायकाचार्यः (व्याकरणम्)
वेदविज्ञानपरम्पराविभागः
चिन्मय-विश्वविद्यापीठम्
आदिशङ्करनिलयम्, आदिशङ्करमार्गः
वेलियानाड्, एरणाकुलम् (कोच्चि), केरलम्, भारतम्

शोधपत्रस्य संक्षेपः

*चक्रपाणिविजयम् इति महाकाव्यम् महाकविना भट्टलक्ष्मीधरेण विरचितम् अस्ति। अयं कविवरः महाराजस्य भोजस्य सभायाम् प्रसिद्धेषु कविषु अन्यतमः आसीत्। अस्य चक्रपाणिविजयम् इति कृतिः विंशत्या सर्गैः विलसति। कवीनां हि प्रयोगाः भवन्ति विशिष्टाः इति अध्येतृभिः ज्ञायते एव काव्यानाम्। तत्र बहुत्र बहुविधरीत्या अर्थसङ्गतिः भवति कर्तव्या। तत्रैव च व्याकरणात् ऋते काव्यावगमनं तु दुःशकमेव। पञ्चमहाकाव्यादिषु मल्लीनाथादिभिः महदेव लोकोपकारकं कार्यं कृतं वर्तते इति न कस्यापि अज्ञातं संस्कृतलोकस्थस्य। तत्र इतरेषु अपि महाकाव्येषु शब्दगता स्पष्टता आवश्यकी अस्ति इति कृत्वा चक्रपाणिविजयम् इति महाकाव्यम् आदाय व्याकरणप्रकरणशः चिन्तनं कर्तुं कश्चन यत्नः अत्र विधीयमानः अस्ति शोधप्रबन्धे। तत्रास्मिन् लेखे तावत् कतिपयानां समासविचाराणाम् एव सङ्ग्रहः अकारि।*

**मुख्य-शब्दाः :** *चक्रपाणिः, जगद्गोप्तरि, अर्थिशून्यम्, सोमपरिग्रहार्थम्, तदस्मै, मदग्रतः, तुरङ्गच्युतः, जानुस्पृष्टमहीतलः, अनुनक्तम्, विच्छायभावः।*

## शोधपत्रस्य मुख्यं विषयवस्तु

व्याकरणदृष्ट्या साधुशब्दविवेचनम्

1 चक्रपाणिरित्यस्मिन् पदे समासविचार

पुनातु पादान्तपतद्धरित्रीसीमन्तरत्नप्रतिबिम्बितो वः।
तन्मस्तकारूढसुरारिभारनिरस्तिहेतोरिव **चक्रपाणिः**[1]॥

तन्मस्तकारूढसुरारिभारनिरस्तिहेतोः पादान्तपतद्धरित्रीसीमन्तरत्नप्रतिबिम्बितः इव चक्रपाणिः वः पुनातु इत्येवं क्रमेण अन्वयः।

मङ्गलश्लोके विशिष्टः प्रयोगः **चक्रपाणिः** इति वर्तते। **चक्रं पाणौ यस्य सः** इति विग्रहपूर्वकः **चक्रपाणिः** इति बहुव्रीहिः समासो भवति। अयं समासः अन्यपदार्थप्रधानो भवति। उदाहरणेऽस्मिन् **'अनेकमन्यपदार्थे**[2]**'** इत्यमुना सूत्रेण समासः क्रियते। यस्य चार्थः- अनेकं प्रथमान्तम् अन्यपदार्थे वर्तमानं वा समस्यते स बहुव्रीहिः। एवं विचारिते सति 'चक्रं पाणौ यस्य सः चक्रपाणिः' इत्यत्र उभयोः पदयोः विभक्तिभेदः दृश्यते खलु! समानाधिकरणत्वं नास्तीत्यर्थः। तर्हि **'चक्रं पाणौ यस्य सः चक्रपाणिः'** अत्र व्यधिकरणत्वे सत्यपि

प्रयोगसाधुत्वमस्ति वा ? अस्ति चेत्कुतः ? तदिह विचार्यते -

**'सप्तमीविशेषणे बहुव्रीहौ'** इत्यत्र सप्तमीग्रहणमेव तज्ज्ञापकम् । तद्यथा **'कण्ठेकालः'** इत्यादिषु विचार्यते। कण्ठे तिष्ठतीति कण्ठेस्थः, स कालो यस्येति विग्रहः। **सुपी[4]**ति योगविभागात्कः। **'सप्तम्युपमानपूर्वपदस्य[5]'**ति बहुव्रीहिसमासः, स्थशब्दलोपः। **'अमूर्धमस्तकात् स्वाङ्गादकामे'** इत्यनेन सप्तम्या अलुक्। ननु कण्ठेस्थशब्दः यद्यपि प्रथमान्त एवात्र बहुव्रीहौ पूर्वपदं तस्य कालशब्देन सामानाधिकरण्यमस्त्येवेति कथं सप्तमीग्रहणं व्यधिकरणपदबहुव्रीहिज्ञापकम् ? किञ्च विशेषणत्वादेव सिद्धे किं वा सप्तमीग्रहणेन ? इति चेत् यदा स्थपदमनादृत्य कण्ठे इत्यस्याधिकरणत्वं, तस्य च कालरूपे उत्तरपदार्थे उपसङ्क्रमः, तदा कण्ठे इत्यस्य अप्रथमान्तत्वाद्बहुव्रीहेः अप्रसक्तेः तत्र सप्तम्यन्तस्य पूर्वनिपातः अस्फुटः स्यात्। ततश्च सप्तमीग्रहणात् **अप्रथमान्तोऽपि बहुव्रीहिः क्वचिदस्तीति** विज्ञायते इति ज्ञेयम्। इत्थं सूत्रे सप्तमीग्रहणं न क्रियते चेत् समानाधिकरणत्वे एव बहुव्रीहेः प्रवृत्तिरिति आयाति । तस्मात् **'चक्रपाणि'**रित्यादिषु रूपेषु बहुव्रीहिः न स्यात् । अतः एतादृशेषु रूपेषु व्यधिकरणतयापि बहुव्रीहिः उपपन्नः यथा स्यात्तदर्थम् एषा व्यवस्था क्रियते पाणिनिना । अतः **'चक्रं पाणौ यस्य सः चक्रपाणिः'** इति सङ्गच्छते। एतादृशः व्यधिकरणापन्नः प्रयोगः सर्गान्तरे अपि लक्षितः। तद्यथा -

अपूर्वमुर्वीपतिपुत्रि वर्तते तवाद्य वक्त्रं गतयावकाधरम्।
**विशुद्धिजातोदरपत्रपाटवं** द्विरेफपीते मधुनीव पङ्कजम्[7]॥

उर्वीपतिपुत्रि! अद्य तव गतयावकाधरं वक्त्रम् अपूर्वं वर्तते। द्विरेफपीते मधुनि इव **विशुद्धिजातोदरपत्रपाटवं** पङ्कजम् इत्येवम् अन्वयः। पद्ये अस्मिन् **विशुद्धिजातोदरपत्रपाटवम्** इति पदं पङ्कजम् इति पदस्य विशेषणम् अस्ति। समस्तपदे अस्मिन् बहुव्रीहिः समासः अस्ति। तथा च विग्रहः - **'विशुद्ध्या जातम् उदरे पत्राणां पाटवं यस्मिन्'** इत्येवं विगृहीते उपर्युक्तप्रकारेण समाससङ्गतिः वाच्या।

**2 जगद्गोप्तरि** इत्यत्र समासविचारः

दोर्दण्डदर्पोपशमात्सुराणां भयापहारेण च दानवानाम्।
आसी**ज्जगद्गोप्तरि** यत्र वीरे सर्वत्र शस्त्रव्यवहारभङ्गः[8]॥

सुराणां भयापहारेण दानवानां दोर्दण्डदर्पोपशमात् यत्र जगद्गोप्तरि वीरे सर्वत्र शस्त्रव्यवहारभङ्गः आसीत् इत्येवम् अन्वयः।

महाराजो बलिः शिष्टरक्षको दुष्टशिक्षकश्चासीत् । स च देवानां भयमपगमय्य दैत्यानां मदञ्च प्रशमय्य राज्यं शशास। अतः विप्लवस्याभावात् शस्त्रप्रयोगप्रसङ्गो नासीदिति तात्पर्यम्।

पद्येऽस्मिन् जगद्गोप्तरि इति पदं प्रयुज्यते। तत्र षष्ठीसमासः। जगतः गोप्ता इति विगृहीतव्यम्। परन्त्विदमयुक्तम्। गुपू रक्षणे इति धातोः **'ण्वुल्तृचौ'** इति सूत्रेण तृचि गोप्ता इति रूपम्। ततश्च **'कर्तृकर्मणोः कृति[10]'** इति सूत्रेण जगच्छब्दात् षष्ठी विधीयते। तत्र **'षष्ठी[11]'** इति सूत्रेण समासे प्राप्ते **'प्रतिपदविधाना षष्ठी न समस्यते[12]'** इति तस्य निषेधः। किन्तु **'कृद्योगा च षष्ठी समस्यते इति वाच्यम्[13]'** इति वार्तिकेन षष्ठीसमासः प्रतिप्रसूयते। तथापीह **'तृजकाभ्यां कर्तरि[14]'** इति निषेधो दुर्वारः। कर्त्रर्थतृजकाभ्यां षष्ठी न समस्यते इति तदर्थः। जगतः कर्ता इत्यादौ यथा।

अत्रेदं समाधानम् - **'घटानां निर्मातुस्त्रिभुनविधातुश्च कलहः'** इत्यत्र भट्टोजिदीक्षितोक्तरीत्या नेयं कारकषष्ठी किन्तु कर्मणः शेषत्वेन विवक्षायां **'षष्ठी शेषे**[15]**'** इति सूत्रेण षष्ठी इति वक्तव्यम्, पूर्वोत्तरसाहचर्यात्। तृजकाभ्यां कर्तरीति कारकषष्ठ्या एव निषेधः। ततो न दोषः। महाभाष्यव्याख्याता कैयटस्तु **'बहुषु बहुवचनमि**[16]**'**ति सूत्रे **'इह कदाचिद्गुणो गुणिविशेषको भवती'**ति भाष्यप्रयोगात् अनित्योऽयं निषेधः इति मन्यते। **गुणिनो विशेषकः** इत्यत्र विशेषकः इति कर्तरि ण्वुल्प्रत्ययान्तः। अथवा गोप्ता इत्यत्र नायं तृच् परन्तु तृन्। ततश्च **'न लोकाव्ययनिष्ठाखलर्थतृनाम्**[17]**'** इति षष्ठीनिषेधः। इह प्रयोगे जगद् इति द्वितीयान्तम् इति वा समाधेयम्।

एतादृशः अन्यत्र अपि कवेः प्रयोगाः दृश्यन्ते, तद्यथा -

'जिते **जगज्जेतरि** पुष्पकेतौ
कान्तारतिस्थानमनोहरिम्णि[18]॥

'उषे **त्वन्मुखनिर्मातुः** किमुपादानकारणम्[19]'॥
सृष्टिसंहरणघस्मरशक्तेः का कथाप्यथ जगत्त्रयभर्तुः[20]। इत्यादि। एषु स्थलेषु अपि उक्तप्रकारेण समाधातुं शक्यते।

**3 अर्थिशून्यम्** इति पदे समास-विचारः -

यत्किञ्चिदप्यादित एव दत्तं तेनैव लोकेषु कृतार्थितेषु।
आजन्म दृष्ट्वा जग**दर्थिशून्यम**न्तः प्रहृष्टं रुदितं च येन[21]॥

येन बलिना आदित एव आजन्म अपि यत् दत्तं तेनैव कृतार्थितेषु लोकेषु जगत् अर्थिशून्यं दृष्ट्वा अन्तः प्रहृष्टं रुदितम् इत्येवम् अन्वयः।

श्लोके **अर्थिशून्यम्** इत्यत्र **अर्थिभिः शून्यम्** इति विग्रहे कर्तव्ये केन सूत्रेण अत्र समासः वक्तव्यः इति जिज्ञासा जायते? **अर्थिभिः** इत्यत्र **कर्तरि तृतीया।** अतः **'कर्तृकरणे कृता बहुलम्**[22]**'** इत्यनेन समासः वक्तव्यः। परन्तु समस्यमानं **शून्यम्** इति पदम् अत्र कृदन्तम् अस्ति वा इति विवेकः आदौ कर्तव्यः स्यात्, तथाहि **शून्यम्** इत्यस्य सुधाव्याख्याकारः इत्थं व्युत्पत्तिमाह - शुने हितम्, **'शुनः सम्प्रसारणं वा च दीर्घत्वं तत्संयोगेन चान्तोदात्तत्वम्**[23]**'** इत्यादिगसूत्रेण शब्दोऽयं **यत्** इति तद्धितप्रत्ययान्तः सम्पद्यते। ननु समासविधायकसूत्रे **`कृता'** इति वचनश्रवणात् **शून्यम्** इति पदेन समासाय उत्तरपदतद्धितान्तत्वम् अत्र बाधकं स्यात् तत्कृदन्तत्वाभावात्। एवं चेत् **'कर्तृकरणे कृता बहुलम्**[24]**'** इति सूत्रेण समासः अत्र न भवेत्। यद्यपि अत्र कृदन्तेन एव समासः तथापि सूत्रे बहुलग्रहणसामर्थ्यात् तद्धितान्तेन अपि समासः वक्तुं शक्येत इति मे मतिः। तथाहि बहुलम् -

**क्वचित्प्रवृत्तिः क्वचिदप्रवत्तिः क्वचिद्विभाषा क्वचिदन्यदेव।**
**विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति॥**

बहुलप्रपञ्चात् अस्मात् क्वचिदन्यदेव इत्यर्थम् आदाय कृद्भिन्नस्य अन्यस्य एव तद्धितान्तस्य ग्रहणं कर्तुं शक्यते प्रकृते समासाय। तस्मात् **अर्थिशून्यम्** इत्यत्र समासः निर्बाधः स्यात्। यद्यपि **'तृतीया तत्कृतार्थेन गुणवचनेन**[25]**'** इत्यत्र **तृतीया** इति योगविभागेन अपि समर्थेन **शून्यम्** इति पदेन समासः वक्तुं शक्यते परन्तु योगविभागः अयं भाष्ये अनारूढ इति कृत्वा बहवः अस्मिन् उपाये अरुचिं प्रकटयन्ति। अतः बहुलग्रहणमाश्रित्य **अर्थिशून्यम्** इत्यत्र समासः वक्तुं शक्येत इति यत्नमात्रम् अत्र अस्माभिः कृतम्।

**4 सोमपरिग्रहार्थम्** इत्यत्र समासविचारः -

शब्द–ब्रह्म E ISSN 2320 – 0871
भारतीय भाषाओं की अंतर्राष्ट्रीय मासिक शोध पत्रिका 17 जनवरी 2020
पीअर रीव्यूड रेफ्रीड रिसर्च जर्नल

दीक्षावतः **सोमपरिग्रहार्थम**भ्यागते यस्य सदा सुरेन्द्रे।
शची शुचैवाश्रुजलं मुमोच व्याजो बभूवाध्वरधूमखेदः[26]॥

यस्य (बलेः) **सोमपरिग्रहार्थम्** अभ्यागते सुरेन्द्रे शची शुचैव अश्रुजलं मुमोच इत्याद्येवम् अन्वयः। अत्र श्लोके प्रयुक्ते **सोमपरिग्रहार्थम्** इत्यस्मिन् पदे का समासव्यवस्था वक्तव्या इति जिज्ञासा जायते। समस्ते अस्मिन् पदे उत्तरपदे **अर्थ** इति शब्दः दृश्यते। समासप्रकरणे अर्थशब्दस्य चर्चा **'तृतीया तत्कृतार्थेन गुणवचनेन[27]'** इस्यस्य सूत्रस्य कथनसमये क्रियते। तत्रोच्यते - तृतीयान्तं तृतीयान्तार्थकृतगुणवचनेन अर्थशब्देन च सह समस्यते इति। ननु **धान्येन अर्थः धान्यार्थः** इत्युदाहृतस्य इव **सोमपरिग्रहेण अर्थः** इति विग्रहप्रदर्शनपुरस्सरं समासः अत्र न स्यात्। यतः एवं क्रियमाणे तत्पुरुषे प्रायेण उत्तरपदार्थप्राधान्यात् अर्थशब्दस्य पुंस्त्वाच्च **सोमपरिग्रहार्थः** इति स्यात्। प्रसिद्धं च अर्थशब्दस्य पुंस्त्वम् अमरादिकोशेषु। **सोमपरिग्रहार्थम्** इति नपुंसकत्वं न प्रतिप्रसूयेत। अतः युक्त्यन्तरम् अत्र चिन्त्यं स्यात्। तथाहि - **'चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः[28]'** इत्यत्र उच्यते यत् - चतुर्थ्यन्तार्थाय यत्तद्वाचिनार्थादिभिश्च चतुर्थ्यन्तं वा समस्यते इति। परन्तु अत्र अर्थशब्दस्य विषये **'अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम्[29]'** इत्येतं विषयं मनसि निधाय एव विचारः कर्तव्यः स्यात्। प्रकृते **द्विजाय अयं द्विजार्थः सूपः** इत्यादिवत् **सोमपरिग्रहाय इदम्** इत्यादि विशेष्यत्वेन क्लीबस्थं किमपि न दृश्यते। अतः द्वितीयेयं युक्तिरपि इह न युज्येत।

तदधुना बहुव्रीहिपक्षमादाय तृतीया युक्तिः विचार्यते। **सोमपरिग्रहः अर्थः** (प्रयोजनम्) **यस्य तत्** सोमपरिग्रहार्थम् इत्येवं विग्रहपुरस्सरं **'अनेकमन्यपदार्थे[30]'** इत्यनेन समासः वक्तव्यः। परन्त्वत्र अन्यपदार्थत्वेन किं ग्राह्यम् इति शङ्का उदेति। अन्यपदार्थप्रधानो हि खलु बहुव्रीहिः इति चेदुच्यते - अत्र **सोमपरिग्रहार्थं** सुरेन्द्रस्य आगमनरूपि सामान्यं कर्म एव अन्यपदार्थत्वेन ग्राह्यम्। सोमपरिग्रहार्थम् ह्येतत् आगमनरूपिण्याः क्रियायाः क्रियाविशेषणत्वेन परिगण्यते। **'क्रियाविशेषणानां कर्मत्वं क्लीबता च'** इत्यनेन सोमपरिग्रहार्थम् इति क्लीबत्वम् अपि युज्यते। इत्येवं प्रकारेण **सोमपरिग्रहार्थम्** आगते सुरेन्द्रे, **भोजनार्थं** गच्छामि, **क्रीडार्थं** धावामि, **दर्शनार्थम्** आगतः अस्मि इत्यादिषु उक्तया व्यवस्थया समाधानं वक्तुं शक्यते इत्यस्मच्चिन्तनम्।

**5 तदस्मै** इत्यत्र समासः

को नाम तस्याभवदाहवेषु कोदण्डचण्डध्वनिसन्निधाने।
नम**स्तदस्मै** विजयोदयाय यस्मिन्नहिंसा शिशिरः प्रतापः[31]॥५२॥

आहवेषु कोदण्डचण्डध्वनिसन्निधाने (तस्य) प्रतापः अहिंसाशिशिरः। विजयोदयाय तदस्मै नमः इत्याद्येवम् अन्वयः।

अत्र तदस्मै इति समस्ते पदे अस्ति समासवैलक्षण्यम्। प्रकृते **स च अयञ्च, तदयं, तदस्मै** इत्येवं विगृह्य **'विशेषणं विशेष्येण बहुलम्[32]'** इत्यनेन कर्मधारयः उच्यते। अत्र तच्छब्दः इदमः विशेषणभूतः अतः इयं व्यवस्था कथ्यते।

**6 तेषामग्रतः / तदग्रतः**

रणे गृहीताः परमाभिमानादन्ते तु ये जीवितमुक्तिकामाः।
**तदग्रतो** यः करुणार्द्रचेताश्चकार तास्ताः सुकुमारगोष्ठीः[33]॥

रणे परमाभिमानात् गृहीताः ये जीवितमुक्तिकामाः **तदग्रतः** करुणार्द्रचेताः ताः ताः सुकुमारगोष्ठीः चकार इत्याद्येवम् अन्वयः।

प्रकृते **तदग्रतः** इत्यस्मिन् पदे समासविशेषः अस्ति कश्चन। **तेषाम् अग्रतः** इत्यस्यां स्थितौ **'षष्ठी[34]'** इत्यनेन सूत्रेण समासः प्राप्यते। परन्तु **अग्रतः** इति अस्ति **तसिल्प्रत्ययान्तम्[35]** **अव्ययम्[36]**। अतः कारणात् **'पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन[37]'** इति सूत्रेण षष्ठ्यन्तस्य पदस्य अव्ययेन सह समासस्य निषेधः उच्यते। एवं चेत् **तेषाम् अग्रतः** इत्येव अत्र प्रयोक्तव्यं स्यात्। **तदग्रतः** इति वक्तुं न युज्येत, इति चेत् अत्र उच्यते - **पूरणगुण ...** इति सूत्रे पूर्वोत्तराभ्यां सत्तव्याभ्यां कृद्भ्यां साहचर्यात् कृदन्तम् एव अव्ययम् अत्रग्राह्यं भवति नतु तद्भिन्नं तद्धितान्तम् अथवा अन्यत्। विषयश्चैष **'सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम्[38]'** इति न्यायसिद्धः। तस्मात् **तदुपरि** इत्यादि अपि सिद्धं भवति इति **रक्षितः** इति सिद्धान्तकौमुद्याम् **भट्टोजिदीक्षिताः** वदन्ति। एवञ्च **तदुपरि** इत्यादिवत् तदग्रतः इत्यपि शक्यं वक्तुम्। अपि च **'अनेकमन्यपदार्थे[39]'** इत्यस्मिन् सूत्रे **'सर्वपश्चात्'** इति भाष्यकारस्य प्रयोगः अपि **तदग्रतः** इति रूपसाधनाय अनूकूलः दृश्यते। महाभाष्यव्याख्याता कैयटस्तु अव्ययेन षष्ठीसमासस्य निषेधस्य **वृक्षस्योपरि** इत्यादि अस्ति उदाहरणम् इति कथयति। कैयटेन **'अनेकमन्यपदार्थे'** इति सूत्रस्थस्य **'सर्वपश्चात्'** इत्यस्य शब्दस्य व्याख्यानं कुर्वता भाष्यकारवचनप्रामाण्यात् अव्ययेन अपि षष्ठीसमासः भवति इत्युक्तम्। नागेशेन तु **सर्वपश्चात्** इत्यादीनां साधनाय पूर्वोत्तरसाहचर्यादि-पूर्वोक्ता एव युक्तिः आश्रिता। एवं प्रकारेण तदग्रतः इति षष्ठीसमासः न दुष्टः।

अपरः अपि प्रकारः अत्र तदग्रतः इत्यस्य साधनाय आश्रयितुं शक्यः। तदेवम् - **तेषाम् अग्रं तदग्रम्** इति षष्ठीसमासः। **तदग्र** इति शब्दात् **'पञ्चम्यास्तसिल्[40]'** इत्यनेन तसिल्-प्रत्ययान्तः **तदग्रतः** इति सिद्ध्यति।

**7 तुरङ्गच्युत** इत्यत्र समासविचारः

भग्ने बले वैरिबलोन्मुखस्य मही महासाहससानुरागा।
व्याजात्**तुरङ्गच्युत**चामराणां पथि स्वकेशास्तरणं करोति[41]॥

वैरिबलोन्मुखस्य बले भग्ने महासाहससानुरागा मही तुरङ्गच्युतचामराणां व्याजात् पथि स्वकेशास्तरणं करोति इत्याद्येवम् अन्वयः।

अत्र श्लोके तुरङ्गच्युतचामराणाम् इत्यस्य पदस्य तुरङ्गेभ्यः च्युतानां चामराणाम् इत्येवं विग्रहसङ्गतिः। ननु **तुरङ्गेभ्यः च्युताः तुरङ्गच्युताः** इत्यत्र कथं समासः वक्तव्यः इति जिज्ञासा जायते। पञ्चमीसमासप्रपञ्चे तावत् **'पञ्चमी भयेन[42]'**, **'अपेतापोढमुक्तपतितापत्रस्तैरल्पशः[43]'**, **'स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन[44]'** इति त्रिसूत्री एव दृश्यते। सूत्रत्रयेणापि **तुरङ्गेभ्यश्च्युता** इत्यत्र समासः नैव सिद्ध्यति प्रकृतपरिष्ठितेस्तत्रानन्तर्भावात्। कस्तर्हि समासाय अत्र यत्नः विधेयः, इति चेत् केचन उपायाः अत्रोच्यन्ते। तथाहि - **द्वितीयातृतीयेत्यादियोगविभागादन्यत्रापि तृतीयादिविभक्तीनां प्रयोगवशात्समासो ज्ञेयः** इति वरदराजाचार्यः[45]। एवञ्चेत् **'पञ्चमी भयेन'** इत्यत्र पञ्चमी इति योगविभागेन **तुरङ्गच्युताः** इति पञ्चमीसमासः वक्तुं शक्येत। परन्तु योगविभागे अस्मिन् किं बीजम् ? किमयं योगविभागः त्रिमुनिसम्मतः? इत्यादयः जिज्ञासाः जायन्ते। तथाहि - **'तपरस्तत्कालस्य[46]'** इत्यस्मिन्

सूत्रे **तपर** इति पदस्य विग्रहः एवं क्रियते महाभाष्यकारेण -**तादपि परः तपरः**[47] इति। अत्र महाभाष्यकारेण उक्ते विग्रहे पञ्चम्यन्तम् पदं वीक्ष्य तपर इत्यत्र समासाय **पञ्चमी** इति योगविभागं केचित् कल्पयन्ति। अतः एतेन प्रकारेण **तुरङ्गच्युता** इत्यत्र अपि पञ्चमी समासः वक्तुं शक्यः। अथवा **'सह सुपा[48]'** इत्यनेन अत्र केवलसमासः वक्तव्यः। अथवा मयूरव्यंसकादिगणे तुरङ्गच्युत इति शब्दस्य अन्तर्भावं कृत्वा **'मयूरव्यंसकादयश्च[49]'** इत्यनेन अत्र व्यवस्था वक्तव्या।

अन्यमपि कञ्चन उपायमत्र समासाय आश्रयितुं शक्नुमस्तद्यथा - **'कृत्यैरधिकार्थवचने[50]'** इत्यत्र **'साधनं कृतेति वा पादहारकाद्यर्थम्[51]'** इति भाष्यवार्तिकात् प्रकारद्वयम् आदाय तुरङ्गच्युत इत्यत्र समासः भवेत्। प्रथमतया तावत् वार्तिके**वा** इति ग्रहणसामर्थ्यात् **'कर्तृकरणे कृता बहुलम्[52]'** इत्यतः अनुवर्तमानं **बहुलम्** इति पदं विवक्षितम्। एतद्बहुलग्रहणसामार्थ्यात् **पादाभ्यां हारकः पादहारकः** इति सिध्यति।

अपरः प्रकारस्तु वार्तिके स्फुटतया उक्त एव **साधनं कृता** इत्यादि। साधनं नाम कारकम्। तेन तत्तत्कारकस्थं पदं कृदन्तेन सह समस्यते इति अर्थः प्रसूतः भवति। अतः अपि **पादाभ्यां हारकः पादहारकः** इति सिद्धयति। न च भाष्ये प्रदर्शिते **पादाभ्यां ह्रियते पादहारक** इति विग्रहे **पादाभ्याम्** इत्यत्र कर्तरि करणे वा तृतीया भ्रमणीया। तथा चेत् **'कृत्यैरधिकार्थवचने'** इत्यादिनैव सिद्धिस्स्यात्। भाष्योक्तं च वार्तिकम् एतत् व्यर्थं स्यात्। व्यर्थेन सता वार्तिकेन पादाभ्याम् इति पञ्चम्यन्तस्य एव पदस्य हारकः इति पदेन सह समासः ध्वन्यते। तथाह्येतद्वार्तिकव्याख्यानावसरे[53] कैयटः - **'पादाभ्यामिति। अपादाने पञ्चमी।'** इति। नागेशश्चात्र कैयटवचनं स्पष्टीकुर्वन्नाह[54] - **'पादाभ्यामित्यस्य कर्तृकरणतृतीयान्तत्वे यथान्यासेऽपि सिद्ध्यतीत्यत आह - अपादाने पञ्चमीति'**। तदेवं प्रकारेण **तुरङ्गेभ्यः च्युताः तुरङ्गच्युताः** इत्यत्र अपि पञ्चमीसमासः निर्वाह्यः इति अस्मत्प्रयासः।

निष्कर्षः

अस्मिन् लेखे आहत्य सप्त विचाराः संकलिताः सन्ति। यद्यपि एतावत्सु एव विचारेषु कवेः समासपाटवं समग्रं परिचितं न भवति तथापि कवेः समासप्रयोगपरिपरिपाट्याः परिचयम् अवाप्यध्येता महाकाव्यस्य अस्य रसास्वादनं कर्तुं शक्नोति इति कश्चन प्रयासः। अनेन प्रयासेन काव्यस्य अध्ययने रतानां प्रविष्टव्याकरणानां च नूनम् एव प्रयोजनं भवेत् इति विश्वसिमि।

सन्दर्भ ग्रन्थ

1 च.वि. स. १ श्लो.सं. १
2 अष्टा. २.२.२४
3 अष्टा. २.२.३५
4 अष्टा. ३.२.४
5 वै.सि.कौ. ८३०
6 अष्टा. ६.३.१२
7 च.वि. स.६ श्लो.सं.४६
8 च.वि. स. १ श्लो.सं. १५
9 अष्टा. ३.१.१३३
10 अष्टा. २.३.६५
11 अष्टा. २.२.८
12 वा. १३२०
13 अष्टा. १३१७
14 अष्टा. २.२.१५
15 अष्टा. २.३.५०
16 अष्टा. १.४.२१
17 अष्टा. २.३.६९
18 च.वि. स.३ श्लो.४२
19 च.वि. स.१० श्लो.५७
20 च.वि. स.९ श्लो.१०
21 च.वि. स. १ श्लो.सं. १६
22 अष्टा. २.१.३२
23 ग.सू. ५.१.२
24 अष्टा. २.१.३२

*25 अष्टा. ३.१.३०*
*26 च.वि. स. १ श्लो.सं. १३*
*27 अष्टा. ३.१.३०*
*28 अष्टा. २.१.३६*
*29 वा. १२७३ / १२७४*
*30 अष्टा. २.२.२४*
*31 च.वि. स. १ श्लो.सं. १३*
*32 अष्टा. २.१.५७*
*33 च.वि. स. १ श्लो.सं. ५५*
*34 अष्टा. २.२.८*
*35 अष्टा. ५.३.७*
*36 अष्टा. १.१.३८*
*37 अष्टा. २.१.११*
*38 प. ११२*
*39 अष्टा. २.२.२४*
*40 अष्टा. ५.३.७*
*41 च.वि. स. १ श्लो.सं. ६२*
*42 अष्टा. २.१.३७*
*43 अष्टा. २.१.३८*
*44 अष्टा. २.१.३९*
*45 ल.सि.कौ., 'सप्तमीशौण्डैः' (२.१.४०) इत्यत्र।*
*46 अष्टा. १.१.७०*
*47 एओङ् - ऐऔच् इत्यत्र वृद्धिरादैच्(१.१.१) इत्यत्र च महाभाष्ये। प्रकाशकः - हरयाणा-साहित्य-प्रकाशनम्, गुरुकुलम् - झज्जर, पृष्ठसङ्ख्या क्रमशः - ७९, १४०*
*48 अष्टा. २.१.४*
*49 अष्टा. २.१.७२*
*50 अष्टा. २.१.३३*
*51 वा. १२५८*
*52 अष्टा. २.१.३२*
*53 म.भा., प्र.व्या., पृ.सं.३७६*
*54 म.भा., उद्.व्या., पृ.सं.३७६*

***सङ्केताक्षरसूचिः -***

*अष्टा. = अष्टाध्यायी, वै.सि.कौ. = वैयाकरणसिद्धान्तकौमिदी, च.वि. = चक्रपाणिविजयम्, स. = सर्गः, श्लो.सं. = श्लोकसंख्या, वा. = वार्तिकम्, ग.सू. = गणसूत्रम्, प. = परिभाषा, ल.सि.कौ = लघुसिद्धान्तकौमुदी म.भा. = महाभाष्यम्, प्र.व्या. = प्रदीपव्याख्या, उद्.व्या. = उद्योतव्याख्या, पृ.सं. = पृष्ठसंख्या।*